Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६66 - घ

Title श्रीराजराजेश्वरी महात्रिपुरसुंदरी

Author +

Extent १३ Age +

Subject तन्त्रम् - संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६ ७७-घ

श्रीराजराजेश्वरी महात्रिपुरसुंदरी

सहस्रनाम स्तोत्रम (तन्त्रम)

पत्राणि १३ (त्रयोदशानि) (संपूर्णम)

© Dharmartha Trust J&K. Digitized by eGangotri

#5677

नं. १२९८० क
राजराजेश्वरी महात्रिपुरसुन्दरी
सहस्र नाम स्तोत्र
१३ पन्ने

श्रीराजराजेश्वरीमहात्रिपुरसुंदरीसहस्रनामम्

२६२९

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६८८-घ

त्रि· सुं·
स·

ॐश्रीदेव्यैमहात्रिपुरसुंदर्यैनमः श्रीगणपतिपादपद्मेभ्योनमः कैला
सशिखरेरम्येनानारत्नोपशोभिते कल्पपादपमध्यस्थेनानापुष्पोप
शोभिते मणिमंडपमध्यस्थेमुनिगंधर्वसेविते तंकदाचित्सुखासीनं
भगवंतंजगद्गुरुं कपालखट्वांगधरंचंद्रार्धकृतशेखरं त्रिशूलडमरु
हस्तंमहावृषभवाहनं जटाजूटधरंदेवंकंठेवासुकिभूषणं विभूति
भूषणंनाथंनीलकंठंत्रिलोचनं द्वीपिचर्मपरीधानंशुद्धस्फटिकसन्नि
भं सहस्रादित्यसंकाशंगिरिजार्धांगभूषितं प्रणम्यशिरसाविश्वकारणं
विश्वरूपिणं कृतांजलिपुटोभूत्वापप्रच्छशिखिवाहनः श्रीस्कंदउवा·
देवदेवमहादेवसृष्टिस्थित्यंतकारक त्वंगतिःसर्वदेवानांत्वंगतिःसर्वदे
हिनां त्वंत्रातासर्वलोकानांदीनानांचत्वमेवहि त्वमेवजगदाधारत्वमे

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं सर्वकारणं त्वमेव पूज्यः सर्वेषां त्वत्तो नान्यास्ति मे गतिः किं गुह्यं परमं
लोके किमेकं सर्वसिद्धिदं किमेकं परमं श्रेष्ठं किं लोके स्वर्गमोक्षदं विना
तीर्थैर्न तपसा विना दानैर्विना मखैः विना लयेन ध्यानेन केन सिद्धिमवाप्नु
यात् कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत् कस्मादुत्तीर्यते देव सं
सारार्णवसंकटात् तदहं श्रोतुमिच्छामि कथयस्व महेश्वर श्रीमहादेवः
साधु साधु त्वया पृष्टं मह्यं हैमवतीसुत अस्ति गुह्यतमं स्कंद कथयिष्याम्य
संशयं सत्त्वं रजस्तमश्चैव ब्रह्मविष्णुमहेश्वराः ये चान्ये बहवो भूताः सर्वे प्र
कृतिसंभवाः सैव देवी पराशक्तिर्महात्रिपुरसुंदरी तया प्रसूयते विश्वं त
या विश्वं प्रपाल्यते सैव संहरते विश्वं जगदेतच्चराचरं आधारः सर्वभूतानां
सर्वरोगार्तिहारिणी इच्छाक्रियातथाज्ञानं ब्रह्मविष्णुशिवात्मिका त्रिधा

© Dharmartha Trust J&K. Digitized by eGangotri

शक्तिस्वरूपेणसृष्टिस्थितिविनाशिनी सृज्यतेब्रह्मरूपेणविष्णुरूपे
णपाल्यते संहरेद्रुद्ररूपेणजगदेतच्चराचरं यस्यांयोनौजगत्सर्वमद्या
पिवर्त्ततेखिलं यस्यांप्रलीयतेचांतेयस्यांश्चजायतेपुनः यांसमाराध्य
त्रैलोक्येसंप्राप्तंपदमुत्तमं यस्यानामसहस्रंतेकथयामिशृणुष्वतत्
अस्यश्रीमहात्रिपुरसुंदरीनामसहस्रस्तोत्रस्य श्रीभगवानदक्षिणामूर्त्ति
र्वामदेवऋषिः गायत्रीछंदः समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौ
लनिगर्भरहस्यातिरहस्य परापरातिरहस्याचिंत्यप्रभाववतीश्रीभगव
तीदेवता आकाशोबीजं मायाशक्तिः कामबीजंकीलकंजीवोबीजं
बुद्धिशक्तिः धर्मार्थकाममोक्षार्थेपाठेविनियोगः अथध्यानं आधा
रेतरुणार्कबिंवसदृशंबीजंचवागुद्भवं बीजंमान्मथमिंद्रगोपकनि

© Dharmartha Trust J&K. Digitized by eGangotri

मंहृत्पंकजेस्थितं चक्रेभालमयेशशांकरुचिरं बीजंचतात्तीयकं ।
येध्यायंतिपदत्रयंतवशिवेतेयांतिसूक्ष्मांगतिं श्रीदेव्यैनमः कल्या
णीकमलाकालीकरालीकामरूपिणी कामाख्याकामदाकाम्याका
मिणीकामचारिणी कालरात्रिर्महारात्रिःकौलिनीकालरूपिणी कौ
मारीकरुणाकीर्तिःकलिकल्मषनाशिनी कात्यायनीकलाधाराकौ
मुदीकमलप्रिया कीर्तिदाबुद्धिदामेधानीतिज्ञानीतिवत्सला माहेश्व
रीमहामायामहातेजामहेश्वरी महाजिह्वामहालोलामहादंष्ट्रामहाभु
जा महामोहांधकारघ्नीमहामोक्षप्रदायिनी महादारिद्र्यराशिघ्नीमहाश
त्रुविमर्दिनी महाशक्तिर्महाज्योतिर्महासुरविमर्दिनी महाकायीमहावी
र्यीमहापातकनाशिनी महामखामंत्रमयीमणिपूरनिवासिनी महाका

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि·सु·
स·
3

यामहादृष्टिर्महाहंघ्रकनाशिनी मानसीमानदामान्यामनश्चक्षुरगो
चरा गणमाता चगायत्री गणगंधर्वसेविता गिरिजागिरिशासाध्वीगिरि
स्थागिरिसंभवा चंडेश्वरीचंडरूपाप्रचंडाचंडमालिनी चर्चिताचर्चिता
काराचंडिकाचंडरूपिणी यज्ञेश्वरीयज्ञरूपाजपयज्ञपरायणा यज्ञमाताय
ज्ञभोक्त्रीयज्ञेशीयज्ञसंभवा क्रियासिद्धिर्यज्ञांगीयज्ञरक्षिका यज्ञक्रियायज्ञ
रूपायाज्ञीयज्ञक्रियालया जालंधरीजगन्माताजातवेदाजगत्प्रिया जितें
द्रियाजितक्रोधाजननीजन्मदायिनी गंगागोदावरीगौरीगौमतीच शतद्रु
का घर्घरादेवगर्भाचदेविकाकरसंभवा सिंधुर्मंदाकिनीक्षिप्रायमुना
चसरस्वती चंद्रभागाविपाशाचगंडकीविंध्यवासिनी नर्मदाकह्नुःका
वेरीवेत्रवतीचकौशिकी महेंद्रतनयाचैवत्वहल्याचणयकावती श्रयो

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यामथुरामायाकाशीकांचीह्यवंतिका द्वारावतीचतीर्थेशीमहाकिल्बिष
नाशिनी पद्मिनीपद्महस्ताचपद्मकिंजल्कवासिनी पद्मवक्त्राचपद्माक्षी
पद्मस्थापद्मसंभवा ह्रींकारीकुंडलीधात्रीहृत्पद्मस्थासुलोचना श्रींका
रभूषणालक्ष्मीः क्लींकारीक्लेशनाशिनी हरिप्रियाहरेर्मूर्तिर्हरिनेत्रकृता
लया हरिवक्त्रोद्भवाशांताहरवक्षःस्थलस्थिता वैष्णवीविष्णुरूपाचविष्णुमा
तास्वरूपिणी विष्णुमायाविशालाक्षीविशालनयनोज्वला विश्वेश्वरीच
विश्वात्माविश्वेशीविश्वरूपिणी शिवेश्वरीशिवाराध्याशिवनाथाशिवप्रिया
शिवमाताशिवाख्याचशिवदाशिवरूपिणी भवेश्वरीभवाराध्याभवेशीभ
वनायिका भवमाताभावगम्याभवकंटकनाशिनी भवप्रियाभवानंदा
भवानीभवमोचिनी वतिर्वरेण्यासावित्रीब्राह्मणीब्रह्मवादिनी ब्रह्मेशी

© Dharmartha Trust J&K. Digitized by eGangotri

५

त्रि·सं·
स·
५

ब्रह्मदाब्राह्मीब्रह्माणीब्रह्मरूपिणी दुर्गस्थादुर्गरूपाचदुर्गादुर्गतिनाशिनी
सुगमादुर्गमादांतादयादोग्ध्रीदुरापहा दुर्गतिघ्नीदुराध्यक्षादूरदुष्कृतना
शिनी पंचस्थापंचमीपूर्णापूर्णपीठनिवासिनी सत्वस्थासत्वरूपाचस
त्वदासत्वसंभवा रजःस्थाचरजोरूपारजोगुणसमुद्भवा तमःस्थाचत
मोरूपातामसीतामसप्रिया तमोगुणसमुद्भूतासात्विकीराजसीतमी क
लाकाष्ठानिमेषाचमुहूर्त्तातदनंतरा अर्धमासाचमासाचसंवत्सरस्वरू
पिणी युगस्थायुगरूपाचकल्पस्थाकल्परूपिणी नानारत्नविचित्रां
गीनानाभरणमंडिता विश्वात्मिकाविश्वरूपाविश्वपाशविनाशिनी वि
श्वासकारिणीविश्वाविश्वशक्तिविचक्षणा जपाकुसुमसंकाशादा
डिमीकुसुमोपमा चतुरंगीचतुर्बाहुश्चतुराचारुहासिनी सर्वेशीस

© Dharmartha Trust J&K. Digitized by eGangotri

वेदासर्वासर्वासर्वार्थदायिनी सर्वेश्वरीचसर्वाद्याशर्वाणीसर्वमंगला
नलिनीनंदिनीनंदाचानंदानंदवर्धिनी व्यापिनीसर्वभूतेशीभवमाया
विनाशिनी कुलीनाकुलमध्यस्थाकुलधर्मोपदेशिनी सर्वशृंगारवे
शाढ्यापाशांकुशकरोद्यता सूर्यकोटिसहस्राभाचंद्रकोटिनिभानना
गणेशकोटिलावण्याविष्णुकोट्यरिमर्दिनी दावाग्निकोटिज्वलिनीरुद्र
कोट्युग्ररूपिणी समुद्रकोटिगंभीरावायुकोटिमहाबला आकाशकोटि
विस्तारायमकोटिभयंकरी मेरुकोटिसमुच्छ्रायागणकोटिसमृद्धिदा नि
ष्कलंकानिराधारानिर्गुणागुणवर्जिता अशोकशोकरहितातापत्रयवि
वर्जिता विशिष्टाविश्वजननीविश्वाद्याविश्ववर्धिनी चित्राविचित्राचि
त्रांगीहेतुगर्भाकुलेश्वरी इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिःशुचिस्मि

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ सु॰ स॰

श्रुतिःस्मृतिमयीसत्याश्रुतिरूपाश्रुतिप्रिया स्मृतिप्रज्ञामहातत्त्वापंचत
त्त्वोपरिस्थिता पार्वतीहिमवत्पुत्रीपरस्थापाररूपिणी जयंतीभद्रकाली
चत्वकुलाकुलनायिका भूतधात्रीचभूतेशीभूतस्थाभूतभाविनी
महाकुंडलिनीशक्तिर्महाविभववर्धिनी हंसाख्याहंसरूपाचहंस
स्थाहंसरूपिणी सोमसूर्याग्निमध्यस्थाब्रह्मद्वारनिवासिनी द्वाद
शासरोजस्थासूर्यमंडलवासिनी अकलंकाशशांकाभाषोडशारति
वासिनी द्विपत्रतलमध्यस्थाललाटतलवासिनी डाकिनीराकिणीचैव
लाकिनीकाकिनीतथा शाकिनीहाकिनीचैवषट्चक्रक्रमवासिनी
सृष्टिस्थितिविनाशात्मासृष्टिस्थित्यंतकारिणी श्रीकंठप्रियाश्रीकंठाना
दाख्याविंदुमालिनी चतुःषष्टिकलाधारादेहदंडसमाश्रया महाका-

© Dharmartha Trust J&K. Digitized by eGangotri

लीद्युतिर्मेधास्सुधातुष्टिर्महाद्युतिः हिंगुलामंगलाशांतिः सुषुम्णामध्य
गामिनी पराघोराकरालाक्षीविजयाजयकारिणी हृत्पद्मनिलयाभीमा
महाभैरववादिनी आकाशलिंगसंभूताभुवनोद्यानवासिनी महासू
क्ष्माचकंकालीभीमरूपामहाबला मेनकागर्भसंभूतातप्तकांचनस
न्निभा अवस्थाकूटवीजाचत्रिकूटाचलवासिनी वर्णाख्यावर्णरहिता
पंचाशद्वर्णभेदिनी विद्याधरीभूतधात्रीचाप्सराश्चाप्सराप्रिया दक्षा
दाक्षायणीदीक्षादक्षयज्ञविनाशिनी यशस्विनीयशःपूर्णायशोदागर्भ
संभवा देवकीदेवमाताचराधिकाकृष्णवल्लभा अरुंधतीतथेंद्राणीगांधा
रीगंधमादिनी ध्यानातीताध्यानगम्याध्यानस्थाध्यानधारिणी लंबो
दरीचलंबोष्ठीजांबवतीजलोदरी महोदरीमुक्तकेशीमुक्तिकामार्थसि-

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ सुं॰ स॰ 6

ह्रिदा तपस्विनीतपोनिष्ठात्वपर्णापर्णीभक्षिणी वाणचापधरावीरापां
चालीपंचमप्रिया गुह्यागंभीरगहनागुह्यतत्त्वानिरंजना अशरीराश
रीरस्थासंसारार्णवतारिणी अमृतानिष्कलाभद्रासकलाकृष्णपिंगला
चक्रेश्वरीचक्रहस्तापरचक्रविनाशिनी पद्मरागप्रतीकाशानिर्मला
काशसन्निभा ऊर्ध्वस्थाचोर्ध्वरूपाचऊर्ध्वपद्मनिवासिनी कार्यका
रणकर्त्रीचस्पर्शाख्यारूपसंस्थिता रसज्ञारसमध्यस्थागंधस्थागंधरू
पिणी परब्रह्मस्वरूपाचपरब्रह्मनिवासिनी शब्दब्रह्मस्वरूपाचशब्दा
ख्याशब्दवर्जिता सिद्धिर्ऋद्धिःपरावृद्धिःसत्कीर्तिर्दीप्तिमंडिता सुगुह्याशां
भवीशक्तिस्तत्त्वतातत्त्वरूपिणी शाश्वतीभूतमाताचमहाभूताधिपप्रिया
स्तुतिःप्रज्ञाधर्मसिद्धिर्दत्तकन्यापराजिता कामसंदीपिनीकामासदाकाम

© Dharmartha Trust J&K. Digitized by eGangotri

कुतूहला भोगोपचारकुशलाविमलाह्यमलानना भक्तानुकंपिनीमैत्री
शरणागतवत्सला क्षोभिणीमोहिनीचैवस्तंभिनीजृंभिणीतथा रथिनीध्व
जिनीसेनासर्वमंत्रमयीत्रयी ज्ञानमुद्रामहामुद्रायोनिमुद्रामहोत्सवा
सहस्रभुजाचिच्छक्तिः सहस्राक्षीशतानना सिद्धलक्ष्मीर्महालक्ष्मीराज
लक्ष्मीः सुलक्षणा यज्ञसारातपःसाराधर्मसाराजनेश्वरी विश्वेश्वरीवि
श्वश्रेष्ठाविश्वाख्याविश्वतोमुखी विश्वास्यश्रवणघ्राणाविश्वपालापरा
त्मिका तरुणादित्यसंकाशाकिरणानेकसंकुला जटाज्जूटधरामुखा
शुष्कमांसातिभीषणा द्वीपिचर्मपरीधानाचीरवल्कलधारिणी त्रिशूल
डमरुकरावनमालाविभूषणा अत्युग्ररूपिणीचोग्राकल्पांतदहनोपमा
त्रैलोक्यसाधिनीसाध्यासिद्धसाधकवल्लभा सर्वविद्यामयीसारावैरिवर्ग

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि·सु·

स·

विदारिणी सुभगासुमुखीसौम्यासुधासोमभूषणा शुद्धस्फटिकसंका
शामहावृषभवाहना माहेशीमहिषारूढामहिषासुरमर्दिनी दमनीदा
मिनीदांतिर्दं महादुरितापहा अग्निजिह्वामहाघोराघोराघोरतरानना
नारायणीनारसिंहीनृसिंहहृदयस्थिता योगेश्वरीयोगरूपायोगमाता
चयोगिनी खेचरीभूचरीचेलानिर्वाणपदसंश्रया नागिनीनागकन्याचसुरसा
नागनायिका विषज्वालावतीदीप्ताकलाशतविभूषणा भीमवक्त्रामहावक्त्रा
वक्त्राणांकोटिधारिणी महाव्रताचधर्माख्याधर्मीतिसुखदायिनी कृष्णमूर्धाम
हामूर्धाघोरमूर्धावरानना सर्वेंद्रियमयीमातासर्वेंद्रियमनोमयि सर्वसंग्राम
जयदासर्वप्रहरणोद्यता सर्वपीडोपशमनीसर्वारिष्टविनाशिनी सर्वैश्वर्यस
मुत्पत्तिःसर्वग्रहविनाशिनी भीतिघ्नीभक्तिगम्याचभक्तानामार्तिनाशिनी ।

© Dharmartha Trust J&K. Digitized by eGangotri

मातंगीमत्तमातंगीमतंगकुलमंडिता गंडमंडितताटंका गुंजाहारविभूषणा
संगीता संगीतरसावीणावाद्यकुतूहला अमृतोदधिमध्यस्था कटिसूत्रैरलं
कृता मणिमंडलमध्यस्था प्रवालदशनोज्वला रत्नमंदिरनिष्ठा च रत्नसिंहा
सनस्थिता परमानंदमुदिता त्वीषत्प्रहसितानना कुमुदाललिता दोलाला
स्तालोहितलोचना दिग्वस्त्रा देवदूती च देवदेवाधिदेवता सिंहोपरिसमारू
ढाहिमाचलनिवासिनी अट्टाट्टहासिनी घोरा घोरदैत्यविनाशिनी अत्यु
ग्रारक्तवसना नागकेयूरमंडिता मुक्ताहारलतोपेता तुंगपीनपयोधरा र
क्तोत्पलदलाकारा मदाघूर्णितलोचना समस्तदेवतामूर्तिरसुरक्षयकारिणी
खड्गिनी शूलहस्ता च चक्रिणी चाक्षमालिनी शंखिनी चापिनी बाणा वज्रिणी
वज्रदंडिनी आनंदोदधिमध्यस्था कंठसूत्रैरलंकृता नानाभरणदीप्तांगीना

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि· हृ·
स·
४

नामणिविभूषणा जगदानंदसंभूतिश्चिंतामणिगुणाकरा त्रैलोक्यव्यापि
नीतुर्याचिन्मयानंदरूपिणी त्रैलोक्यनंदिनीदेवीदुःखदुःस्वप्ननाशिनी घोरा
ग्निदाहशमनीरात्रीदेवाधिशालिनी महापराधराशिघ्नीमहाचौरभयापहा
रागादिदोषरहिताजरामरणवर्जिता चंद्रमंडलमध्यस्थापीयूषार्णवसंभ
वा सर्वदेवस्तुतादेवीसर्वसिद्धैर्नमस्कृता अचिंत्यशक्तिरूपाचमणिमंत्र
महौषधिः स्वस्तिःस्वस्तिमतीबालामलयाचलवासिनी धात्रीविधात्रीसं
हर्त्रीरतिज्ञारतिदायिनी रुद्राणीरुद्ररूपाचरौद्रीरौद्रार्तिनाशिनी सर्वज्ञा
सर्वधर्मज्ञारसज्ञादीनवत्सला अनाहतात्रिनयनानिर्वैरानिर्वृतिःपरा
पराघोराकरालास्यासुमाताप्रियदायिनी मंत्रात्मिकामंत्रगम्यामंत्रमा
तासुमंत्रिणी श्रद्धानंदामहारुद्रानिर्द्वंद्वानिर्गुणात्मिका धरणीधारिणी

© Dharmartha Trust J&K. Digitized by eGangotri

पृथ्वीधराधात्रीवसुंधरा मेरुमंदरमध्यस्थास्थिराशंकरवल्लभा श्रीम
तीश्रीमयीश्रेष्ठाश्रीकरीश्रीविधायिनी श्रीदाश्रीपाश्रीनिवासाश्रीःस
तीश्रीमतांगतिः उमाचशार्ङ्गिणीकृष्णाकुटिलाकुटिलालका त्रिलोच
नात्रिलोकात्मापुण्यदापुण्यकीर्तिदा अमृतासत्यसंकल्पासत्याशाग्रं
थिभेदिनी परेशीपरमाराध्यापराविद्यापरात्परा सुंदरांगीसुवर्णाभा
सुरासुरनमस्कृता प्रजाप्रजावतीधन्याधनधान्यसमृद्धिदा ईशानी
भुवनेशानीभुवनाभुवनेश्वरी अनंतानंतमहिमाजगत्साराजगद्भवा
अचिंत्यशक्तिश्चिंत्यात्माचिंत्याचिंत्यस्वरूपिणी ज्ञानगम्याज्ञानमूर्तिः ज्ञानि
नीज्ञानशालिनी अमिताघोररूपाचसुधाधारासुधावहा भास्वराभास्व
तीभांतीभास्वदुत्यानशालिनी (अमिताघोररूपाच) अनसूयाक्षमाल

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि· सं·
स·
१

ज्वादुर्लभा भुवनात्मिका विश्ववंद्या विश्ववीरा विश्वघ्नी विश्वसंस्थिता शी
लस्था शीलरूपा च शीला शीलप्रदायिनी वेधिनी बोधकुशला रोधिनी
बोधिनी तथा विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा विश्वयोनिर्म
हायोनिः कर्मयोनिः प्रियंवदा रोगघ्नी रोगशमनी महारोगज्वरापहा रस
दा पुष्टिदा देवी मानदा मानवप्रिया कृष्णांगवाहिनी चैव कृष्णा कृष्ण महो
दरी शांभवी शंभुरूपा च शंभुस्था शंभुसंभवा विश्वोदरी विश्वमा
ता योगमाता च योगिनी वागीश्वरी योगमुद्रा योगिनीकोटिसेविता
कौलिकानंदकंदा च शृंगाटपीठवासिनी क्षेमंकरी सर्वसिद्धिर्दिव्य
रूपा दिवेश्वरी धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा पिनाकिरु
द्रा वेताली महावेतालरूपिणी तपिनी तापिनी दीक्षा विष्णुविद्यात्मना

© Dharmartha Trust J&K. Digitized by eGangotri

श्रिता मथराजठरातीव्रात्वग्निजिह्वाभयापहा पशुघ्नीविश्वरूपाच
पशुहापशुवाहिनी पितामाताचभ्राताचपशुपाशविनाशिनी चंद्रप्रभाचं
द्रकांतिश्चंद्रकांतविभूषणा कुंकुमांकितसर्वांगीसुधाकुद्धुधलोचना शुक्लां
बरधरादेवीवीणापुस्तकधारिणी श्वेतपद्मधरादेवीश्वेतपद्मासनस्थिता
रक्तांबरधरादिव्यरक्तपद्मविलोचना निष्ठुराक्रूरहृदयात्वक्रूराप्रियभाषि
णी अनौपम्यगुणोपेतासुरमधुरभाषिणी विरूपाक्षीसहस्राक्षीशता
क्षीबहुलोचना दुस्तरातारिणीतारातरुणीचारुरूपिणी सुधाधाराचध
र्मज्ञाधर्मसंकेतदेशिनी भगेश्वरीभगाराध्याभगिनीभगनायिका भग
बिंबाभगक्लिन्नाभगयोनिर्भगप्रदा भगेशीभगरूपाचभगगुह्याभगाव
हा भगोदरीभगानंदाभगाढ्याभगमालिनी सर्वसंक्षोभिणीशक्तिः स

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि·सं·
स·
10

र्वविद्याविर्णीतथा मालिनीमाधवीमाध्वीमदरूपामदोत्कटा भीरुंडाचंडि
काज्योत्स्नाविश्वचद्दुलमोपहा सुप्रसन्नामहादूतीयमदूतीमयंकरी उ
न्मादिनीमहारूपादिव्यरूपासुरार्चिता चैतन्न्यरूपिणीनित्यानित्यक्लिन्ना
मधूत्कटा मदिरानंदकैवल्यामदिराक्षीमदालसा सिद्धेश्वरीसिद्धविद्यासि
द्धार्थासिद्धवंदिता सिद्धार्चितासिद्धमातासंसिद्धिःसर्वसिद्धिदा मनोमयी
गुणातीतापरज्योतिःस्वरूपिणी परेशीपारगापारापरासिद्धिःपराग
तिः विमलामोदिनीमाद्यामधुपानपरायणा वेदवेदांगजननीसर्व
शास्त्रमयीकथा सर्वज्ञानमयीदेवीसर्वधर्ममयीश्वरी सर्वयज्ञमयी
यज्ञासर्वमंत्राधिकारिणी सर्वसंपत्त्याधिष्ठात्रीसर्वविद्राविणीपरा
सर्वसंभोगिनीदेवीसर्वमंगलकारिणी त्रैलोक्याकर्षिणीदेवीसर्वाह्ला

© Dharmartha Trust J&K. Digitized by eGangotri

दनकारिणी सर्वसंमोहिनीसर्वदेवीदुःखक्षयंकरी त्रैलोक्यवर्धिनीदे
वदेवीसर्ववशंकरी त्रैलोक्यरंजिनीदेवीसर्वोन्मादनवर्धिनी सर्वार्थसा
धनीदेवीसर्वसंपत्तिदायिनी सर्वमंत्रमयीदेवीसर्वद्वंद्वक्षयंकरी सर्व
सिद्धिप्रदादेवीसर्वसंपत्प्रदायिनी सर्वप्रियंकरीदेवीसर्वसंतोषकारिणी
सर्वकामप्रदादेवीसर्वदुःखविमोचिनी सर्वमृत्युप्रशमनीसर्वविघ्नवि
नाशिनी सर्वांगसुंदरीमातासर्वसौभाग्यदायिनी सर्वज्ञासर्वशक्तिश्च
सर्वैश्वर्यफलप्रदा सर्वज्ञानमयीदेवीसर्वव्याधिविनाशिनी सर्वाधारस्व
रूपाचसर्वपापहरातथा सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी सर्व
र्वलक्ष्मीमयीविद्यासर्वेप्सितफलप्रदा सर्वदुष्टप्रशमनीपरानंददायि
नी त्रिकोणनिलयात्रिस्था त्रिमाता त्रितनुस्थिता त्रयीविद्यात्रयीसा

© Dharmartha Trust J&K. Digitized by eGangotri

रात्रैलोक्येशीत्रिपुष्करा त्रिकोदरस्थात्रिविधात्रिपुरात्रिपुरात्मिका
त्रिधाम्नीत्रिदशीत्र्यक्षात्रिघ्नीत्रिपुरवासिनी त्रिवर्णात्रिपदीत्र्यास्थात्रि
मूर्त्तिस्त्रिपुरेश्वरी त्रिदिवात्रिदशेशाचत्रिमूस्त्रिपुरवासिनी त्रिपुराक्षी
स्त्रिजननीत्रिसूस्त्रिपुरसुंदरी १००० इतित्रिपुरसुंदर्यामंत्रनामसहस्रकं
सर्वविघ्नप्रशमनंसर्वारिष्टविनाशनं गुह्याद्गुह्यतरंपुत्रतवप्रीत्याप्रकी
र्त्तितं गोपनीयंप्रयत्नेनपठनीयंप्रयत्नतः नातःपरतरंपुण्यंनातः
परतरंतपः नातःपरतरंस्तोत्रंनातःपरतरागतिः स्तोत्रंसहस्रनामाख्यं
ममवक्त्राद्विनिर्गतं यःपठेत्प्रयतोभक्त्याशृणुयाद्वासमाहितः मो
क्षार्थीलभतेमोक्षंस्वर्गार्थीस्वर्गमाप्नुयात् कामार्थीप्राप्नुयात्कामा
मान्धनार्थीलभतेधनं विद्यार्थीलभतेविद्यांयशोर्थीलभतेयशः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कन्यार्थी लभते कन्यां सुतार्थी लभते सुतान् गुर्विणी जनयेत्पुत्रं कं
न्याविंदति सत्यतिं मूर्खोपि लभते शास्त्रं चौरोपि लभते गतिं अमा
वस्यायां संक्रांतावष्टम्यां च विशेषतः पौर्णिमास्यां चतुर्दश्यां नवम्यां
भौमवासरे पठेद्वा पाठयेद्वापि शृणुयाद्वा समाहितः समुक्ताः सर्व
पापेभ्यो धनेश्वरसमो भवेत् लक्ष्मीवान्सुतवांश्चैव वल्लभः सर्वयोषि
तां तस्यवश्यं भवेदाशु त्रैलोक्यं सचराचरं रुद्रं दृष्ट्वा यथा देवा विष्णुं दृ
ष्ट्वा च दानवाः पन्नगा गरुडं दृष्ट्वा सिंहं दृष्ट्वा यथा गजाः मंडूका भोगि
नं दृष्ट्वा मार्जारं मूषकास्तथा शत्रवः प्रपलायंते तस्य वक्त्रावलोकनात्
अग्निचौरभयं तस्य कदाचिन्नैव संभवेत् पातका विविधाः संति मेरुमं
दिरसन्निभाः भस्मसाद्यांति वैक्षिप्रं तृणं वह्निहुतं यथा एकदा पठना

© Dharmartha Trust J&K. Digitized by eGangotri

देवसर्वपापक्षयोभवेत् नश्यंतिसहस्रारोगादशधावर्तितेनच शतधा
पठनादेववांचासिद्धिःप्रजायते सहस्रधापठेद्यस्तुखेचरोजायतेनरः
सहस्रदशकंयस्तुपठेद्दैभक्तिमान्नरः सातस्यजगतांधात्रीप्रत्यक्षाभव
तिध्रुवं लक्षपूर्णंयदापुत्रस्तोत्रराजमिमंसुधीः भवपाशविनिर्मुक्तोम
मतुल्योनसंशयः सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं सर्वकर्म
सुयज्ञंमेसर्वदानेषुयत्फलं सर्ववेदेष्वधीतेषुयत्फलंपरिकीर्त्तितं
तत्सर्वंसमवाप्नोतिसहस्रनामकीर्तनात् यद्दैतंयोगिभिर्ज्ञानंज्ञाति
मिर्दुर्लभंचयत् तत्कोटिगुणितंपुण्यंसकृज्जप्त्वालभेन्नरः स्तुत्वाल
त्पुत्रधनंप्रज्ञावान्सर्वसंपदः देहांतेपरमंस्थानंयत्सुरैरपिदुर्लभं
सयास्यतिनसंदेहःस्तवराजस्यकीर्तनात् भुक्त्वाभोगाननेकांस्तुमत्तो

© Dharmartha Trust J&K. Digitized by eGangotri

मोक्षमवाप्नुयात् इदंरहस्यंपरमंनाख्येयंयस्याचित् दत्तेचसि
द्धिहानिःस्यादित्यापारमेश्वरी इतिश्रीवामकेश्वरतंत्रेहरकुमार
13 संवादेश्रीराजराजेश्वरीमहात्रिपुरसुंदरीसहस्रनामस्तोत्रंसमाप्तम्

© Dharmartha Trust J&K. Digitized by eGangotri

१३

त्रि. सं.

स.

13

© Dharmartha Trust J&K. Digitized by eGangotri